# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा – आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – 3** | गुणाः - ७० |
| विषयः – वेदः | **कोड – CC-5.3.8** | समयः – ३.०० तः ६.०० |
| दिनाङ्कः – ११/१०/२०१९ | सन्दर्भग्रन्थः –ऋग्वेदभाष्यभूमिका | |

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १** **एकस्य सूत्रस्य व्याख्या विधेया** ०५

(१) अर्थवादो वा ।

(२)तदर्थशास्त्रात् ।

**प्रश्नः – २** **एकस्योत्तरं यथाभाष्यं देयम् ।** १०

(१) कथं यजुर्वेदस्य व्याख्यानम् आदौ करणीयमिति सिद्धान्तयत ।

(२) मन्त्रब्राह्मणात्मकत्वं तावददृष्टं लक्षणम् – इत्यस्य व्याख्यां कुरुत ।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३** **अधोलिखितयोः सूत्रयोः कस्यचिद् एकस्य सूत्रस्य व्याख्यां यथाभाष्यं लिखत ।** ०५

(१)विद्याप्रशंसा

(२)आख्या प्रवचनात्

**प्रश्नः – ४** **एकस्य निबन्धात्मकमुत्तरं यथाभाष्यं देयम् ।** १०

(१) अर्थवादभागस्य प्रमाण्यं निरूपयत ।

(२) 'अहे बुध्निय मन्त्रं मे गोपाय' - इत्यस्य भाष्यभूमिकानुसारं

विवेचयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५** **कस्यचित् एकस्य भाष्यार्थः लेख्यः।** ०५

(१) यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्राविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥
(२) प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥

**प्रश्नः – ६** **एकस्योत्तरं यथाभाष्यं देयम्।** १०

(१) वेदार्थस्य प्रशंसा एवं निन्दाविषये च ऋग्वेदभाष्यभूमिकायाः कथनं स्पष्टयत।
(२)यथाशास्त्रं मन्त्राणां त्रैविध्यमुपपादयत।

## चतुर्थान्वितिः (Unit-४)

**प्रश्नः – ७** **द्वयोः किमपि एकम् उत्तरयत।** ०५

(१) कल्पवेदाङ्गम्
(२) व्याकरणशास्त्रस्य प्रयोजनम्

**प्रश्नः – ८** **एकस्योत्तरं देयम्।** १०

(१)छन्दःशास्त्रस्य वेदाङ्गतां संसाध्य तस्य प्रयोजनमपि उपस्थापयन्तु।
(२)व्याकरणशास्त्रस्य वेदोच्चारणक्षेत्रे किमस्ति योगदानमिति निरूपयत।

**प्रश्नः – ९** **निम्नलिखितेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तराणि लिखत।** १०

(क)अध्वरस्य नेता कः ?
(ख)मनसः मार्गं कः संस्करोति ?
(ग)सनत्कुमारं प्रति नारदस्य वचनं किमस्ति ?
(घ)'जर्भरी' इति शब्दस्य कोऽर्थः ?

(ङ) ‘वाक्यनियमात्’ इत्यस्योदाहरणं वर्तते –

(च) ‘अर्थविप्रतिषेधात्’ इत्यस्योदाहरणं वर्तते –

(छ)‘अविद्यमानवचनात्’ इत्यस्योदाहरणं वर्तते –

(ज)परिसङ्ख्यायां के सन्ति त्रयो दोषाः ?

(झ)कर्मचोदना ब्राह्मणानि ब्राह्मणशेषः किम् ?

(ञ)‘धर्मब्रह्मणी वेदैकवेद्ये’- इति कुत्र सूत्रितम् ?

(ट) ‘अधिकारी’ इति कथनेन किं ज्ञायते ?

(ठ) ‘ गीतिषु सामाख्या’ इत्यस्य कोऽर्थः ?

(ड) ‘ संतान’ इति शब्दस्य कोऽर्थः ?

(ढ) वेदाङ्गज्योतिषस्य प्रणेता कः ?

(ण)‘यज्ञवृषभस्य त्रयो पादाः के सन्ति ?

(त) निरुक्तस्य द्वितीयकाण्डं किमस्ति ?

***

# **Answer Key**

कक्षा आचार्यद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम् – 3** गुणाः - ७०

विषयः – वेदः **कोड – CC-5.3.8** समयः –

दिनाङ्कः – सन्दर्भग्रन्थः –ऋग्वेदभाष्यभूमिका

**प्रश्नः – ९**

(क) अध्वरस्य नेता कः ? अध्वर्युः

(ख) मनसः मार्गं कः संस्करोति ? ब्रह्मा

(ग) सनत्कुमारं प्रति नारदस्य वचनं किमस्ति ? ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्

(घ) 'जर्भरी' इति शब्दस्य कोऽर्थः ? भर्तारौ

(ङ) 'वाक्यनियमात्' इत्यस्योदाहरणं वर्तते – अग्निर्मूर्द्धा दिवः ककुत्पतिः

(च) 'अर्थविप्रतिषेधात्' इत्यस्योदाहरणं वर्तते – अदितिर्द्यौरदितिरन्तरिक्षम्

(छ) 'अविद्यमानवचनात्' इत्यस्योदाहरणं वर्तते – चत्वारि शृङ्गा त्रयो अस्य पादा......

(ज) परिसङ्ख्यायां के सन्ति त्रयो दोषाः ? प्राप्तवाधः, श्रुतहानि, अश्रुतपरिकल्पना

(झ) कर्मचोदना ब्राह्मणानि ब्राह्मणशेषः किम् ? अर्थवादः

(ञ) 'धर्मब्रह्मणी वेदैकवेद्ये'- इति कुत्र सूत्रितम् ? पुरुषार्थानुशासने सूत्रितम्

(ट) 'अधिकारी' इति कथनेन किं ज्ञायते ? व्याख्यानव्याख्येयभावः संबन्धः ज्ञानार्थी च

(ठ) ' गीतिषु सामाख्या' इत्यस्य कोऽर्थः ? गीतप्रधानवेदः

(ड) ' संतान' इति शब्दस्य कोऽर्थः ? संहिता, सन्धिः

(ढ) वेदाङ्गज्योतिषस्य प्रणेता कः ? आचार्यलगधः

(ण) 'यज्ञवृषभस्य त्रयो पादाः के सन्ति ? त्रयः कालाः भूतभविष्यद्वर्तमानाः

(त) निरुक्तस्य द्वितीयकाण्डं किमस्ति ? नैगमम्